## प्यायः पी । (२८/३०७२)

विभाषा इत्येव । [1]'ओप्यायी वृद्धौ' (धा.पा. ४८८) इत्यस्य धातोः निष्ठायां विभाषा पी इत्ययमादेशो भवति । पीनं मुखम् । पीनौ बाहू । [2]पीनमुरः । इयमपि व्यवस्थितविभाषैव । तेनानुपसर्गस्य नित्यं भवति, सोपसर्गस्य तु नैव भवति । आप्यान[3]श्चन्द्रमाः[4] । आङ्पूर्वस्यान्धूधसोः भवत्येव, आपीनोऽन्धुः, आपीनमूधः इति ॥

## लिड्यङोश्च । (२९/२३२७)

विभाषा इति निवृत्तम् । 'प्यायः पी' (६.१.२८/३०७२) इत्येतत् चशब्देन अनुकृष्यते । लिटि यङि च परतः प्यायः पी इत्ययमादेशो भवति । [5]आपिप्ये, आपिप्याते, आपिप्यिरे । परत्वात् पीभावे कृते पुनः प्रसङ्ग-विज्ञानात् द्विर्वचनम्, एरनेकाचः (६.४.८२/२७२) इति यणादेशः । यङि – आपेपीयते, आपेपीयेते, आपेपीयन्ते ॥

## विभाषा श्वेः । (३०/२४२०)

लिड्यङोः [6]इति वर्तते, सम्प्रसारणम् इति च । लिटि यङि च श्वयतेर्धातोः विभाषा सम्प्रसारणं भवति । शुशाव, शिश्वाय । शुशुवतुः, शिश्वियतुः । यङि – शोशूयते, शेश्वीयते । [7]तदत्र यङि सम्प्रसारणमप्राप्तं [8]विभाषा विधीयते । लिटि तु किति यजादित्वात् नित्यं प्राप्तं, [9]तत्र सर्वत्र विकल्पो भवति इत्येषा उभयत्रविभाषा । यदा च धातोर्न भवति तदा 'लिट्यभ्यासस्योभयेषाम्' (६.१.१७/२४०८) इत्यभ्यासस्यापि न भवति ॥

## णौ च संश्चङोः । (३१/२५७९)

'विभाषा श्वेः' (६.१.३०/२४२०) इति [10]वर्तते । सन्परे चङ्परे च णौ परतः श्वयतेर्धातोः विभाषा संप्रसारणं भवति । शुशावयिषति । चङि – [11]अशूशवत्, अशिश्वयत् । 'सम्प्रसारणं सम्प्रसारणाश्रयं च[12] बलीयो भवति' (सी.दे.प. ५९) इति वचनादन्तरङ्गमपि वृद्ध्यादिकं सम्प्रसारणेन बाध्यते । कृते तु संप्रसारणे वृद्धिरावादेशश्च । ततः 'ओः पुयण्ज्यपरे' (७.४.८०/२५७७) इत्ये[13]तद्वचनं ज्ञापकं णौ कृतस्थानिवद्भावस्य, इति स्थानिवद्भावात् शुशब्दो [14]द्विरुच्यते ॥

## ह्वः संप्रसारणम् । (३२/२५८६)

'णौ च संश्चङोः' (६.१.३१/२५७९) इति वर्तते । [15]सन्परे चङ्परे च णौ परतो ह्वः[16] संप्रसारणं भवति । जुहावयिषति, जुहावयिषतः, जुहावयिषन्ति । अजूहवत्, अजूहवताम्, अजूहवन् । संप्रसारणस्य बलीयस्त्वात् 'शाच्छासाह्वाव्यावेपां युक्' (७.३.३७/२५८५) इति प्रागेव [17]युक् न भवति । सम्प्रसारणम् इति वर्तमाने पुनः सम्प्रसारणम् [18]इत्युक्तं विभाषा इत्यस्य निवृत्त्यर्थम् । ह्वः सम्प्रसारणम् अभ्यस्तस्य इत्येकयोगेन[19] सिद्धे पृथग्योग-करणमनभ्यस्तनिमित्तप्रत्ययव्यवधाने सम्प्रसारणाभावज्ञापनार्थम् । [20]ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन् जिह्वायकीयिषति ॥

---

1. प्यायी क.फ, स्फायी इत्यधिकम् फ. 2. पीनं मुखम् इत्यधिकम् क. 3. सूर्यः क. 4. इति इत्यधिकम् क.फ. 5. लिटि इत्यधिकम् ड. 6. संप्रसारणेऽपि च क. 7. अत्र फ, तत्र क. 8. पक्षे फ.ह. 9. तत्सर्वमिह विकल्पेन क. 10. अनुवर्तते ग.फ.ह. 11. अशूशुवत् फ.ह, अशिश्वियत् इत्यधिकम् फ.ह. 12. कर्म इत्यधिकम् ब.ड.ग.फ. 13. एतत् नास्ति फ. 14. द्विरुच्चार्यते क. 15. सनि परे क. 16. च इत्यधिकम् फ. 17. युग्-ग्रहणं ब.क.फ. 18. इति नास्ति क.फ. 19. एव इत्यधिकम् क.ह. 20. ह्वायकं गच्छति क.